योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ३३

त्रयस्त्रिंशः सर्गः ३३

श्रीवसिष्ठ उवाच ।

गर्जन्तमतिसंरब्धं सुरलोकमथारिहा ।

उवाच माधवो वाक्यं शिखिवृन्दमिवाम्बुदः ।। १

श्रीभगवानुवाच ।

विबुधा मा विषण्णाः स्थ प्रह्लादो भक्तिमानिति ।

पाश्चात्यं जन्म तस्येदं मोक्षार्होऽसावरिंदमः ।। २

अत उत्तरमेतेन गर्भता दनुजन्मना ।

न कर्तव्या प्रदग्धेन बीजेनेवाङ्कुरक्रिया ।। ३

गुणवान्निर्गुणो जात इत्यनर्थक्रमं विदुः ।

निर्गुणो गुणवाञ्जात इत्याहुः सिद्धिदं क्रमम् ।। ४

आत्मीयानि विचित्राणि भुवनान्यमरोत्तमाः ।

प्रयात नासुखायैषा प्राह्लादी गुणितेह वः ।। ५

श्रीवसिष्ठ उवाच ।

इत्युक्त्वा विबुधांस्तत्र क्षीरोदार्णववीचिषु ।

अन्तर्धानं ययौ देवस्तटतापिच्छगुच्छवत् ।। ६

सोऽपि संपूजितहरिः सुरौघो व्रजदम्बरम् ।

पुनर्मन्दरनिर्धूतात्कणजालमिवार्णवात् ।। ७

प्रह्लादं प्रति गीर्वाणास्ततः स्निग्धत्वमाययुः ।

महान्तो यत्र नोद्विग्नास्तत्र विश्वासवन्मनः ।। ८

प्रत्यहं पूजयामास देवदेवं जनार्दनम् ।

मनसा कर्मणा वाचा प्रह्लादो भक्तिमानिति ।। ९

अथ पूजापरस्यास्य समवर्धन्त कालतः ।

विवेकानन्दवैराग्यविभवप्रमुखा गुणाः ।। १०

नाभ्यनन्ददसौ भोगपूगं शुष्कमिव द्रुमम् ।

न चारमत कान्तासु मृगो लोकमहीष्विव ।। ११

न रेमे लोकचर्यासु शास्त्रार्थकथनादृते ।

न जायते रतिस्तस्य दृश्ये स्थल इवाजिनी ।। १२

न विशश्राम चेतोऽस्य भोगरोगानुरञ्जने ।

मुक्ताफलमसंश्लिष्टं मुक्ताफल इवामले ।। १३

त्यक्तभोगादिकलनं विश्रान्तिमनुपागतम् ।

चेतः केवलमस्यासीद्दोलायामिव योजितम् ।। १४

प्राह्लादीं तां स्थितिं विष्णुर्देवः क्षीरोदमन्दिरात् ।

विवेद सर्वगतया धिया परमकान्तया ।। १५

अथ पातालमार्गेण विष्णुराह्लादिताग्रतः ।

पूजादेवगृहं तस्य प्रह्लादस्य समाययौ ।। १६

विज्ञायाभ्यागतं देवं पूजया द्विगुणेद्धया ।

दैत्येन्द्रः पुण्डरीकाक्षमादरात्पर्यपूजयत् ।। १७

पूजागृहगतं देवं प्रत्यक्षावस्थितं हरिम् ।

प्रह्लादः परमप्रीतो गिरा तुष्टाव पुष्टया ।। १८

प्रह्लाद उवाच ।

त्रिभुवनभवनाभिरामकोशं सकलकलङ्कहरं परं प्रकाशम् ।

अशरणशरणं शरण्यमीशं हरिमजमच्युतमीश्वरं प्रपद्ये ।। १९

कुवलयदलनीलसंनिकाशं शरदमलाम्बरकोटरोपमानम् ।

भ्रमरतिमिरकज्जलाञ्जनाभं सरसिजचक्रगदाधरं प्रपद्ये ।। २०

विमलमलिकलापकोमलाङ्गं सितदलपङ्कजकुड्मलाभशङ्खम् ।

श्रुतिरणितविरञ्चिचञ्चरीकं स्वहृदयपद्मदलाश्रयं प्रपद्ये ।। २१

सितनखगणतारकावकीर्णं स्मितधवलाननपीवरेन्दुबिम्बम् ।
हृदयमणिमरीचिजालगङ्गं हरिशरदम्बरमाततं प्रपद्ये ।। २२
अविरलकृतसृष्टिसर्वलीनं सततमजातमवर्धनं विशालम् ।
गुणशतजरठाभिजातदेहं तरुदलशायिनमर्भकं प्रपद्ये ।। २३
नवविकसितपद्मरेणुगौरं स्फुटकमलावपुषा विभूषिताङ्गम् ।
दिनशमसमयारुणाङ्गरागं कनकनिभाम्बरसुन्दरं प्रपद्ये ।। २४
दितिसुतनलिनीतुषारपातं सुरनलिनीसततोदितार्कबिम्बम् ।
कमलजनलिनीजलावपूरं हृदि नलिनीनिलयं विभुं प्रपद्ये ।। २५
त्रिभुवननलिनीसितारविन्दं तिमिरसमानविमोहदीपमग्र्यम् ।
स्फुटतरमजडं चिदात्मतत्त्वं जगदखिलार्तिहरं हरिं प्रपद्ये ।। २६
श्रीवसिष्ठ उवाच ।
इति गुणबहुलाभिर्वाग्भिरभ्यर्चितोऽसौ हरिरसुरविनाशः श्रीनिषण्णांसदेशः ।
जलद इव मयूरं प्रीतिमान्प्रीयमाणं कुवलयदलनीलः प्रत्युवाचासुरेन्द्रम् ।। २७

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषूपशमप्रकरणे नारायणागमनं नाम त्रयस्त्रिंशः सर्गः ।। ३३ ।।